# प्रार्थनाः *prārthanāḥ* – PRAYERS

***Translations by Rāmulu Gajavāḍa, Sanskrit Teacher***

ॐ सह नाववतु । सह नौ भुनक्तु । सह वीर्यं करवावहै । तेजस्वि नावधीतमस्तु मा विद्विषावहै । ॐ शान्तिः शान्तिः शान्तिः ॥ १

***oṁ saha nāvavatu | saha nau bhunaktu | saha vīryaṁ karavāvahai | tejasvi nāvadhītamastu mā vidviṣāvahai | oṁ śāntiḥ śāntiḥ śāntiḥ* || 1**

ॐ गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुर्देवो महेश्वरः

रुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥ १

*oṁ gururbrahmā gururviṣṇuḥ gururdevo maheśvaraḥ |*
*gurureva paraṁ brahma tasmai śrīgurave namaḥ || 1*

अज्ञान तिमिरान्धस्य ज्ञानाञ्जलशलाकया

चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥ २

*ajñānatimirāndhasya jñānāñjalaśalākayā |*
*cakṣurunmīlitaṁ yena tasmai śrīgurave namaḥ || 2*

अखण्डमण्डलाकारं व्याप्तं येन चराचरम्

तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ३

*akhaṇḍamaṇḍalākāraṁ vyāptaṁ yena carācaram |*
*tatpadaṁ darśitaṁ yena tasmai śrīgurave namaḥ || 3*

स्थावरं जङ्गमं व्याप्तं येन कृत्स्नं चराचरम्

तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ४

*sthāvaraṁ jaṅgamaṁ vyāptaṁ yena kṛtsnaṁ carācaram |*
*tatpadaṁ darśitaṁ yena tasmai śrīgurave namaḥ || 4*

चिद्रूपेण परिव्याप्तं त्रैलोक्यंच चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥ ५

*cidrūpeṇa parivyāptaṁ trailokyañca carācaram |*
*tatpadaṁ darśitaṁ yena tasmai śrīgurave namaḥ ||* 5

सर्वश्रुतिशिरोरत्न समुद्भासितमूर्तये ।
वेदान्ताम्बुजसूर्याय तास्मै श्रीगुरवे नमः ॥ ६

*sarvaśruti-śiroratna-samudbhāsita-mūrtaye |*
*vedāntāmbujasūryāya tāsmai śrīgurave namaḥ ||* 6

चैतन्यः शाश्वतः शान्तो व्योमातीतो निरञ्जनः ।
बिन्दुनादकालातीतः तस्मै श्रीगुरवे नमः ॥ ७

*caitanyaḥ śāśvataḥ śānto vyomātīto-nirañjanaḥ |*
*bindunādakālātītaḥ tasmai śrīgurave namaḥ ||* 7

ज्ञानशक्तिसमारूढः तत्त्वमालाविभूषितः ।
भुक्तिमुक्तिप्रदाता च तस्मै श्रीगुरवे नमः ॥ ८

*jñāna-śakti-samārūḍhaḥ-tattva-mālā-vibhūṣitaḥ*
*bhukti-mukti-pradātā ca tasmai śrīgurave namaḥ ||* 8

अनेकजन्मसम्प्राप्त कर्मबन्धविदाहिने ।
आत्मज्ञान प्रदानेन नेन तस्मै श्रीगुरवे नमः ॥ ९

*aneka-janma-samprāpta-karmabandha-vidāhine |*
*ātma-jñāna pradānena tasmai śrīgurave namaḥ* || **9**

शोषणं भवसिन्धोश्च प्रापणं सारसम्पदः।

यस्य पादोदकं सम्यक् तस्मै श्रीगुरवे नमः॥ १०

*śoṣaṇaṁ bhavasindhośca prāpaṇaṁ sārasampadaḥ|*
*yasya pādodakaṁ samyak tasmai śrī-śrigurave namaḥ ||10*

न गुरोरधिकं तत्त्वं न गुरोरधिकं तपः।

तत्त्वज्ञानात् परं नास्ति तस्मै श्रीरवे नमः॥ ११

*na guror-adhikaṁ tattvaṁ na guror-adhikaṁ tapaḥ |*
*tattvajñānāt paraṁ nāsti tasmai śrī-gurave namaḥ || 11*

मन्नाथः श्रीजगन्नाथो मद्गुरुः श्रीजगत्गुरुः।

मदात्मा सर्वभूतात्मा तस्मै श्रीगुरवे नमः ॥ १२

*mannāthaḥ śrījagannātho madguruḥ śrījagatguruḥ|*
*madātmā sarvabhūtātmā tasmai śrīgurave namaḥ 12*

गुरादिरनादिश्च गुरुः परमदैवतम्

गुरोः परन्तरं नास्ति तस्मै श्रीगुरवे नमः॥ १३

*gurādiranādiśca guruḥ paramadaivatam |*
*guroḥ parantaraṁ nāsti tasmai śrīgurave namaḥ || 13*

ब्रह्मानन्दं परमसुखदं केवलं ज्ञानमूर्तिं

द्वन्द्वातीतं गगनसदृशं तत्त्वमस्यादिलक्ष्यम्।

एकं नित्यं विमलमचलं सर्वधीसाक्षिभूतं

भावातीतं त्रिगुणरहितं सत्गुरुं तं नमामि॥ १४

*brahmānandaṁ paramasukhadaṁ kevalaṁ jñānamūrtiṁ*
*dvandvātītaṁ gaganasadṛśaṁ tattvamasyādilakṣyam* ।
*ekaṁ nityaṁ vimalamacalaṁ sarvadhīsākṣibhūtaṁ*
*bhāvātītaṁ triguṇarahitaṁ satguruṁ taṁ namāmi* ।। 14

त्वमेव माता च पिता त्वमेव  त्वमेव बन्धुश्च सखा त्वमेव ।
त्वमेव विद्या द्रविणं त्वमेव  त्वमेव सर्वं मम देवदेव ॥

*tvameva mātā ca pitā tvameva   tvameva bandhuśca sakhā tvameva* ।
*tvameva vidyā draviṇaṁ tvameva  tvameva sarvaṁ mama devadeva*।।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ॥ १

*śuklāmbara-dharaṁ viṣṇuṁ śaśivarṇaṁ catur-bhujam*।
*prasanna-vadanaṁ dhyāyet sarva-vighnop-aśāntaye* ।। *1*

**वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।**
**निर्विघ्नं कुरु मे देव  सर्वकार्येषु सर्वदा ॥**

***vakratuṇḍa mahākāya sūryakoṭisamaprabha*।**
***nirvighnaṁ kuru me deva  sarvakāryeṣu sarvadā*।।**

अगजाननपद्मार्कं गजाननमहर्निशम् ।
अनेकदंतं भक्तानां एकदन्तमुपास्महे ॥ २

*agajānana-padmārkaṁ gajānana-maharniśam*।
*anekadaṁ-taṁ bhaktānām eka-dantam-upāsmahe* ।। 2

सरस्वति नमस्तुभ्यं  वरदे कामरूपिणि ।

विद्यारम्भं करिष्यामि  सिद्धिर्भवतु मे सदा ॥

***sarasvati namas-tubhyaṁ  varade kāma-rūpiṇi |***
***vidyā-rambhaṁ kariṣyāmi  siddhir-bhavatu me sadā ||***

शुक्लां ब्रह्मविचारसारपरमां आद्यां जगद्व्यापिनीं

वीणापुस्तकधारिणीं अभयदां निःशेषजाड्यापहाम् ।

हस्तेस्फाटिकमालिकां च विदधतीं पद्मासने संस्थितां

वन्दे तां परमेश्वरीं भगवतीं बुद्धिप्रदां शारदाम् ॥

*om śuklāṁ brahma-vicāra-sāra-paramāṁ ādyāṁ jagad-vyāpinīṁ*
*vīṇā-pustaka-dhāriṇīm abhaya-dāṁ  niḥśeṣa-jāḍyāpa-hām |*
*haste-sphāṭika-mālikāṁ ca vidadhatīṁ  padmāsane saṁ-sthitāṁ*
*vande tāṁ parameśvarīṁ bhagavatīṁ buddhi-pradāṁ śāradām ||*

या कुन्देन्दु तुषारहार धवला या शुभ्रवस्त्रान्विता

या वीणावरदण्डमण्डितकरा या श्वेत पद्मासना ।

या ब्रभ्रमाच्युतशङ्करप्रभृतिभिर्देवैः सदा पूजिता

सा मां पातु सरस्वती भावती निःशेषजाड्यापहा ॥

*yā kundendu tuṣāra-hāra dhavalā yā śubhra-vastrānvitā*
*yā vīṇāvara-daṇḍa-manḍita- karā yā sveta padmāsanā |*
*yā brabhramā-cyuta-śaṅkara-prabhṛtibhir-devaiḥ sadā pūjitā*
*sā māṁ pātu sarasvatī bhāvatī niḥśeṣa-jāḍyāpahā||*

ॐ मङ्गलं श्रीकुरुक्षेत्रे   रणक्षोणिविहारिणे ।

पार्थसारथिरूपाय गीताचार्याय मङ्गलम् ॥ ४

*oṁ maṅgalaṁ śrīkurukṣetre  raṇakṣoṇivihāriṇe*।
*pārthasārathirūpāya gītācāryāya maṅgalam* ।। **4**

ओं सर्वे भवन्तु सुखिनः   सर्वेसन्तु निरामयाः ।

सर्वे भद्राध्राणि पश्यन्तु     मा कश्चित् दुःखभाग् भवेत् ॥ ५

*oṁ sarve bhavantu sukhinaḥ*
*sarvesantu nirāmayāḥ* ।
*sarve bhadrāṇi paśyantu*
*mā kaścit duḥkhabhāg bhavet* ।।**5**

स्वस्ति प्रजाभ्यः परिपालयन्तां

न्यायेन मार्गेण महीं महीशाः ।

गोब्राह्मणेभ्यः शुभमस्तु नित्यं

लोकाः समस्ताः सुखिनो भवन्तु ॥

*svasti prajābhyaḥ paripālayantāṁ*
*nyāyena mārgeṇa mahīṁ mahīśāḥ* ।
*gobrāhmaṇebhyaḥ śubhamastu nityaṁ*
*lokāḥ samastāḥ sukhino bhavantu* ।।

ओं भद्रं कर्णेभिः शृणुयाम देवाः  भद्रं पश्येमाक्षभिर्यजत्राः ।

स्थिरैरङ्गैस्तुष्टुवाग्ँ-सस्थनूभिः  व्यशेम देवहितं यदायुः ॥

ओं शान्तिः  शान्तिः  शान्तिः

***oṁ bhadraṁ karṇebhiḥ śṛṇuyāma devāḥ***
***bhadraṁ paśyemākṣabhiryajatrāḥ |***
***sthirairaṅgaistuṣṭuvāgm̐-sasthanūbhiḥ***
***vyaśema devahitaṁ yadāyuḥ ||***
***oṁ śāntiḥ śāntiḥ śāntiḥ***

ओं द्यौः शान्तिरतरिक्षं शान्तिः पृथिवी शान्तिरापः शान्तिरोषधयः शान्तिः।
वनस्पतयः शान्तिर्विश्वदेवाः शान्तिर्ब्रह्म शान्तिः सर्वं शान्तिः शान्तिरेव शान्तिः॥

*oṁ dyauḥ śāntiratarikṣaṁ śāntiḥ pṛthivī śāntirāpaḥ śāntiroṣadhayaḥ śāntiḥ | vanaspatayaḥ śāntirviśvadevāḥ śāntirbrahma śāntiḥ sarvaṁ śāntiḥ śāntireva śāntiḥ ||*